# द्वादशः पाठः
# ''संस्कृतभाषायाः महत्त्वम्''

सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा भाषा अस्ति। अस्माकं संस्कृतिः भाषायामेव निहिता। संसारस्य प्राचीनतमाः चत्वारः वेदाः ऋग्वेदः, यजुर्वेदः सामवेदः अथर्ववेदश्च संस्कृतभाषायां विद्यन्ते। वाल्मीकिना विरचितं रामायणं प्रथमं छन्दोबद्धं महाकाव्यम् अस्ति। अस्मिन्नेव काव्ये सामाजिकाः आदर्शाः निहिताः सन्ति। यथा रामस्य पितृभक्तिः, भरतस्य त्यागः, दशरथस्य पुत्रवात्सल्यं च। महाभारतं नाम संस्कृतस्य ग्रंथः, विश्वज्ञानकोशः प्रतीयते। गीतापि महाभारतस्य एव महत्त्वपूर्णांशः अस्ति। अस्यां भाषायां कविकुलगुरुकालिदासेन अभिज्ञानशाकुन्तलं नाम विश्वप्रसिद्धं नाटकं विरचितम्। गीति काव्येषु तस्य मेघदूतं प्रसिद्धम् अस्ति। जयदेवेन विरचितं गीतगोविन्दं नामकं गीतिकाव्यमपि सर्वाधिकं लोकप्रियम् अस्ति।

पुरा भारते प्रायः सर्वेजनाः संस्कृतभाषायामेव परस्परम् आलपन्ति स्म। तद्यथा एकदा–भोजराजः गच्छन् मार्गे एकं भारवाहकं दृष्टवान्। तस्य शिरसि गुरुतरं भारं दृष्ट्वा भोजराजः तमपृच्छत्– ''अपि भारो बाधति ?



भारवाहकः शीघ्रमेव अवदत्– ''भारो न बाधते राजन्!'' यथा ''बाधति–बाधते''। अनेन प्रतीयते यत् सामान्योऽपि जनः संस्कृतभाषां जानाति स्म।

शनैः–शनैः संस्कृत भाषायाः व्यवहारः शिथिलोऽभवत् किन्तु अद्यत्वेऽपि संस्कृतकक्षासु संस्कृतभाषां जीवितभाषा रूपेण पाठ्यते। भाषासु मधुरा इयं भाषाभारतीयसंस्कृतेः रक्षार्थं ज्ञानवर्धनार्थं च संस्कृतभाषा अवश्यमेव पठितव्या।

## शब्दार्थाः

प्रतीयते = प्रतीत होता है। विरचितम् = बनाया गया। निहिताः = रखी हुई। भारवाहकः = बोझा ढोने वाला। आलपन्ति स्म = बातचीत करते थे। पठितव्या = पढ़ी जानी चाहिए। शिरसि = सिर पर।

## अभ्यासः

**प्रश्न 1. संस्कृत भाषा में उत्तर लिखिए –**

(क) रामायणस्य महाकाव्यस्य रचनां कः अकरोत् ?

(ख) कालिदासः कस्य गीतिकाव्यस्य रचनामकरोत् ?

(ग) संस्कृतभाषा कीदृशी भाषा वर्तते ?

**प्रश्न 2. निम्नांकित अनुच्छेदों का हिन्दी में अर्थ लिखो –**

पुरा भारते .................................. भाषां जानाति स्म।

**प्रश्न 3. निम्न का अर्थ लिखो –**

पुरा, शिरसि, प्रतीयते, रक्षणार्थं

**प्रश्न 4. संस्कृत में अनुवाद कीजिए –**

(क) संस्कृत प्राचीन भाषा है।

(ख) मेघदूत गीतिकाव्य है।

(ग) वाल्मीकि ने रामायण महाकाव्य की रचना की थी।

(घ) संस्कृत भाषा में संस्कृति निहित है।

(ङ) संस्कृत मधुर भाषा है।

PXJQNU